Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ वैष्णवाष्टाक्षरादिमन्त्रप्रसङ्गात् मुक्तिप्रदत्वसामान्येन नामत्रयमपि कल्पान्तरोक्तमत्र योग्यतावशाल्लिख्यते —

पराशरव्यासनारदा ऋषयः । विराट् छन्दः । परब्रह्म देवता । अच्युताय नमः, अनन्ताय नमः, गोविन्दाय नमः, इति मन्त्रः । अथवा अच्युतायानन्ताय गोविन्दाय नमः इति मन्त्रः । मोक्षारोग्यप्रधानोयं मन्त्रः । अस्मिन्पक्षे शौनक ऋषिः । छन्दोदेवते तुल्ये । अच्युताय नमः हृत् । अनन्ताय नमः शिरः । गोविन्दाय नमः शिखा । अच्युताय नमः कवचम् । अनन्ताय नमः नेत्रम् । गोविन्दाय नमः अस्त्रम् ॥

ध्यानम् —

सर्वायुधैरुपेतं च गरुडोपरि संस्थितम् ॥

सनकादिमुनीन्द्रैस्तु सर्वदेवैरुपासितम् ।
श्रीभूमिसहितं देवमुदयादित्यसन्निभम् ॥

प्रातरुद्यत्सहस्रांशुमण्डलोपमकुण्डलम् ।
सर्वलोकस्य रक्षार्थमनन्तं नित्यमेव तु ॥

अनन्तवरदानं च प्रयच्छन्तं मुदान्वितम् ।
एवं ध्यात्वा हरिं नित्यं परब्रह्मस्वरूपिणम् ॥

प्रातर्मध्यन्दिने चैव सायाह्ने च विशेषतः ।
अर्चयेद्देवदेवेशं गन्धपुष्पजलादिभिः ॥

अयमर्थः — बिल्वं वा अश्वत्थं वा स्पृष्ट्वा रोगिणं स्मृत्वा जप्त्वा, पुनरादित्यं मनसा ध्यात्वा तं रोगिणं निरीक्षेत । तस्मादुक्तफलं भवति ॥

प्रयोगान्तरम् —

कन्यार्थी लाजहोमेन श्रीकामो बिल्वपत्रकैः ।
पुत्रार्थी घृतहोमेन चारोग्यार्थी तिलैर्हुनेत् ॥

प्रयोगान्तरम् —

ज्वरग्रहगृहीतं च स्पृष्ट्वा लक्षं जपेज्जले ।
असाध्योपि भवेत्स्वस्थः भस्मना ताडयेद्बुधः ॥

मूर्ध्नि चैव ललाटे च जपेन्मन्त्रत्रयं हृदि ।
आविश्य सर्वं वदति यथेष्टं गच्छति ध्रुवम् ॥

अथ प्रयोगविधिः —

विनियोगं प्रवक्ष्यामि यथावत् द्विजसत्तमाः ।
नास्मात्परतरा रक्षा रोगार्तानां विधीयते ।
अष्टोत्तरसहस्रं वा शतं वा जपसंख्यया ॥

रोगार्तान्मार्जयेन्मूर्ध्नि कुशैर्दूर्वाभिरेव वा ।

अयमर्थः — अनेन मन्त्रेण (अष्टोत्तरसहस्रं)अष्टोत्तरशतं(वा) जप्त्वा कुशैर्वा दूर्वया वा साध्यस्य मूर्ध्नि मार्जयेत् । सर्वे रोगा नश्यन्ति ॥

प्रयोगान्तरम् —

अभिषिञ्चेत्तथा मूर्ध्नि रविवारे तथाम्भसा ।
नित्यं चैव पिबेत्तोयमष्टाविंशतिसंख्यया ॥

सर्वरोगविनिर्मुक्तश्शतवर्षाणि जीवति ।

प्रयोगान्तरम् —

रविवारे जले स्थित्वा नाभिदघ्ने जपेन्नरः ।
अष्टोत्तरसहस्रं तु ज्वरनाशो भविष्यति ॥

प्रयोगान्तरम् —

ग्रहापस्मारकुष्ठादिपिशाचाः प्रेत एव च ।
लक्षं हुनेत्तु दूर्वाभिः तच्छान्तिस्तु भविष्यति ॥

अयमर्थः — दूर्वया लक्षं हुनेत् । ग्रहापस्मारादिशान्तिः ।

प्रयोगान्तरम् —

स्पृष्ट्वाश्वत्थं जपेद्वर्षं रविमण्डलमभ्यगम् ।

अयमर्थः — प्रत्यर्कवारं कलशं संपूज्य जस्वा अभिषिञ्चयेत् । अष्टाविंशतिसंख्यं नित्यं पिबेच्च । तस्मादुक्तफलं भवति ॥

प्रयोगान्तरम् —

हुनेत् घृततिलैर्दूर्वागळूचीभिः पृथक् पृथक् ।
लक्षं जपेन्नाममन्त्रं महारोगस्य शान्तये ॥

गळूची—गुळवेल । अयमर्थः —एतैर्द्रव्यैः पृथक् पृथक् सहस्रं हुनेत् । लक्षं जपेच्च । तस्मादुक्तफलं भवति ॥

प्रयोगान्तरम् —

बिल्वमूले तथाऽश्वत्थमूले वा रोगिणं स्मरन् ।
स्पृशन् जस्वा निरीक्षेत्तमादित्यं मनसा स्मरन् ॥

एवं कृत्वा ततः पुंसो रोगशान्तिर्भविष्यति ।

अथास्य यन्त्रमुच्यते —

षट्कोणमध्ये प्रणवं तदन्तरे साध्यं पुनश्च प्रणवं लिखेद्बहिः ।
प्रागादिकोणेषु मनोः पदानि नामत्रयं यन्त्रमनुत्तमं तत् ॥

अस्यार्थः — प्रथमं षट्कोणं विलिख्य तन्मध्ये प्रणवं विलिख्य तन्मध्ये साध्यनामादीन् विलिखेत् । षट्सु कोणेषु, अच्युतायेति पूर्वकोणे, नम इत्याग्नेयकोणे, अनन्ताय नमः गोविन्दाय नमः एवं षट् पदानि षट्सु कोणेषु विलिख्य, तद्बहिः प्रणवेन वेष्टयेत् । एवं नामत्रययन्त्रमुक्तम् । एतद्विलिख्य धृतेऽभीष्टफलं विशेषतो रक्षाकरं च भवति । इति नामत्रय-कल्पस्समाप्तः ॥

अयमर्थः — ज्वरग्रस्तं वा पिशाचग्रस्तं वा स्पृष्ट्वा पुनर्जले स्थित्वा लक्षं जपेत् । तस्मात् तच्छान्तिर्भवति । अथवा भस्म, साध्यस्य उक्तस्थलेषु मन्त्रं जप्त्वा निक्षिपेत् । तस्मात् भूतपिशाचा आविश्य गच्छन्ति ॥

प्रयोगान्तरम् —

मोक्षकामी जपेन्नित्यमष्टोत्तरसहस्रकम् ।
यावज्जीवं करे तस्य स्थिता मुक्तिर्न संशयः ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च विधवास्तथा ।
गडूचीतिलदूर्वाभिर्घृतबिल्वकुशैश्शरैः ॥

यथाकामी हुनेन्नित्यं तत्तत्कामस्य सिद्धये ।

शरं-दर्भः । अयमर्थः — एतैर्द्रव्यैः पृथक् सहस्रसंख्यं हुनेत् यं कञ्चित्काममुद्दिश्य । तस्मात्तं कामं लभते ॥

ध्यायन्कृष्णं लभेत्कामाननुरूपां कुटुम्बिनीम् ॥

अयमर्थः—रविमण्डलमध्ये श्रीकृष्णं ध्यात्वा अश्वत्थं स्पृष्ट्वा जपेत्। तस्मात् कामांश्चानुकूलां स्त्रियं च लप्स्यति ॥

प्रयोगान्तरम्—

अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगास्सत्यं सत्यं वदाम्यहम् ॥

सर्वे भवन्ति मुक्ताश्च नामत्रयजपान्विताः ।
अगतीनां गतिस्त्वेतन्मन्त्रत्रयमनुत्तमम् ॥

गृहीत्वा वाग्यतो मन्त्रमेकादश्यां सदक्षिणम् ।
यथालाभं जपेन्मन्त्रमर्चयेत्तु विशेषतः ॥

किमत्र बहुनोक्तेन सर्वसिद्धिकरा ह्यमी।
आचार्यात्समभिप्राप्तो ह्यदत्त्वा तस्य दक्षिणाम् ॥

अभ्यस्तोपि महामन्त्रः श्रेयसे नात्र कल्पते ।